संस्कृतवार्ता:

दिनाङ्क: - 21/12/2024 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्र मोदी अद्य द्वि-दिवसीय यात्रायां कुवैत-देशं सम्प्राप्तवान्। तेनोक्तं यत् कुवैत-देशेन सह भारतस्य सम्बन्धा: ऐतिहासिका: महत्वपूर्णा: च वर्तन्ते।
- गृहमन्त्री अमित शाह: त्रिपुरायां अगरतलायां पूर्वोत्तर-परिषद: द्वि-सप्ततितमीयोपवेशनस्य अध्यक्षतां विदधाति।
- भारत देशेन विनिर्माण-क्षेत्रस्य विस्तार-करण-दिशि एशियाई विकास-बैंकेन -साकं - सार्ध-त्रिशत- मिलियन-डॉलर-मितं ऋण-सन्धिपत्रं हस्ताक्षारितम्।
- चिन्ता-हिंसा सदृश-वैश्विक-आह्वानानां अपाकर्तुं अद्य प्रथम-विश्व-ध्यान-दिवस: परिपाल्यते।
- ऋतुविभागेन आगामि-पञ्च-दिवसं यावत् जम्मू-कश्मीर-हिमाचल-प्रदेशे च भीषण-शीतलहर्य्या: अनुमान: अभिव्यक्त:।

---------------------------------

प्रधानमन्त्री-कुवैत

प्रधानमन्त्री नरेन्द्र मोदी द्वि-दिवसात्मकीय-स्वीय आधिकारिक-यात्रायां कुवैत-नगरं सम्प्राप्तवान्। एषा प्रधानमिन्त्रण: यात्रा कुवैत-देशस्य अमीर-शेख-मेशल-अल-अहमद-अल-जाबेर-अल-सबाह्-वर्यस्य निमन्त्रणे वर्तते। प्रधानमन्त्रिणोक्तं यत् असौ कुवैत-नगरे भारतीय-समुदायस्य जनैस्साकं मेलितुं समुत्सुको विद्यते। ये जना: उभयो: देशयो: मध्ये सम्बन्धान् प्रगाढं कुर्तुं प्रयासरता: आसन् तै: सह मेलितुं असौ समुत्सुको वर्तते इति प्रधानमन्त्रिणा प्रतिपादितम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना खाति-क्षेत्रस्य प्रमुख-खेल-प्रतियोगिता-‘अरेबियन-गल्फ-कप’

इत्यस्य उद्घाटनाय आमन्त्रणे कुवैत-प्रशासनं प्रति आभार: प्रकटित:। श्री मोदिनोक्तं यत् तस्या: यात्राया: अस्या: भारत-कुवैत-देशाभ्यां मैत्रीपूर्ण-सम्बन्धा: अधिका: दृढीभूता: भविष्यन्ति।

---------------------------------

## शाह:-पूर्वोत्तर परिषद्

गृहमन्त्रिणा अमित शोहेनोक्तं यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना पूर्वोत्तरीय-क्षेत्रं विश्वस्य केन्द्रं विनिर्मितम्। अगरतलायामद्य पूर्वोत्तर-परिषद: द्वि-सप्तति तमीये पूर्ण-सत्रं सम्बोधयता तेनोक्तं यत् विगतानि दश-वर्षाणि पूर्वोत्तरीय-क्षेत्राणाञ्कृते महती-महत्वपूर्णानि आसन्। तेन भणितं यत् केन्द्र सर्वकार: निवेशकान् पूर्वोत्तर-क्षेत्रेषु विनिवेशाय प्रोत्साहयति।

श्री शाहेनोक्तं यत् पूर्वं पूर्वोत्तरस्य केवलं चर्चा एव प्रचलति स्म्। अधुना प्रधानमन्त्रिणा क्षेत्रस्यास्य विकासाय निष्पक्षतया बहव: प्रयासा: विहिता:। एतेन क्षेत्राणि एतानि महत्वपूर्णाणि सञ्जातानि, केन्द्रीय गृहमन्त्रिणोक्तं यत् आगामिषु दिवसेषु पूर्वोत्तरस्य सर्वाणि राज्यानि समृद्धानि भविष्यन्ति। तेन एतदपि भणितं यत् प्रधानमन्त्री नरेन्द्र मोदी तदीय भारतीय जनता पार्टीति दलं च पूर्वोत्तरं अशेष-देशस्य समक्षं आनेष्यति। श्री शाहेन प्रतिपादितं यत् क्षेत्रेऽस्मिन् उग्रवादी गतिविधय: अपि अपचिता: जाता:। मानव जीवनस्य क्षति: अपि न्यनीभूता।

---------------------------------

## एशियाई विकासबैङ्कयोः

केन्द्रस्य ADB इत्यस्य एशियाई विकासबैङ्कस्य च मध्ये सार्द्ध त्रिशत् मिलियन डॉलरमितस्य नीति-आधारित-ऋण-सहभागित्वे हस्ताक्षरं जातम्। इदं ऋणं बहुविधस्य एकीकृत- -पारिस्थितिकी-तन्त्रस्य )SMILE) इत्यस्य सुदृढीकरणस्य द्वितीयस्य उपकार्यक्रमस्य भागः अस्ति । कार्यक्रमे विनिर्माणं वर्धयितुं आपूर्तिश्रृङ्खलायाः शिथिलता च संशोधनं उद्दिश्य उपकार्यक्रमद्वयं समावेशितम् अस्ति । वाणिज्य-उद्योगमन्त्रालयेन विज्ञप्तौ उक्तं यत् भारतस्य रसद-क्षेत्रस्य विकासः तस्य विनिर्माणक्षेत्रस्य प्रतिस्पर्धां वर्धयितुं महत्त्वपूर्णः अस्ति। मन्त्रालयेन एतदपि उक्तं यत् भारत-एडीबी-इत्येतयोः सहकार्यं रसद-क्षेत्रे विकासं नवीनतां च पोषयितुं सहभाग-प्रतिबद्धतां प्रतिबिम्बयति, भारतस्य व्यापक-आर्थिक-विकास-लक्ष्याणां समर्थनं च करोति।

-----------------------------------

जम्मू-ऋतु:

जम्मू-कश्मीरे चत्वारिंशत्-दिवसानां शीतऋतो: चिल्लई कलां" प्रारब्धं जातम्। विगत-रात्रौ-कश्मीर-उपत्यकायां सर्वेषु क्षेत्रेषु भीषण-शीत-प्रकोप: आकलित:। अखिल-कश्मीर-क्षेत्रे रात्रौ तापमान: अत्यधिक: न्यून: आकलित:।

-----------------------------------

विश्वध्यानदिवसः

अद्य प्रथमः विश्वध्यानदिवसः आचर्यते, यो हि राष्ट्रेषु कल्याणं, शान्तिं, मनःसन्तोषं च प्रवर्धयितुं वैश्विकपरिकल्पना अस्ति। आयोजनस्य विषयः आसीत् "वैश्विकशान्तये -सौहार्दाय च ध्यानम्। विश्वे सर्वत्र भारतीय-संस्थानै: मानसिक-शारीरिक-कल्याणाय ध्यानस्य परिवर्तनकारी-शक्तेः उपरि बलं दत्त्वा प्रथमः विश्व-ध्यान-दिवसः आचर्यते। संयुक्तराष्ट्र-सङ्घेन भारते 'ध्यानं इति कार्यक्रमस्य आतिथ्यं कृतम् 'वैश्विक शान्ति-सद्भावाय च ध्यानं' इति संयुक्तराष्ट्रसङ्घस्य न्यासपरिषदि भारतस्य स्थायीप्रतिनिधिना पी हरीशेन ध्यानस्य प्राचीन भारतीय परम्परायाः विषये प्रकाशितम्। प्रधानमन्त्रिणा नरेन्द्र मोदिना अद्य देशस्य नागरिकान् ध्यानं दैनिकजीवने सम्मिलितुम् आह्वानं कृतम्, सामाजिकान्तर्जालीय संदेशे श्रीमोदी उक्तवान् यत् ध्यानं स्वजीवने अपि च अस्माकं समाजे ग्रहे च शान्तिं सौहार्दं च आनेतुं सशक्तः उपायः अस्तीति।

-----------------------------------

जीएसटी परिषद्

जीएसटी परिषद: पञ्चपञ्चाशत-तमीयो-पवेशनं राजस्थानस्य जैसलमेरे जातम्। वित्त-मन्त्री निर्मलासीतारामण: उपपवेशनस्य अस्य अध्यक्षतां विदधाति। उपवेशने अस्मिन् गोवा, हरियाणा, जम्मू-कश्मीर-मेघालय-ओडिशा राज्यानां मुख्यमन्त्रिण:, अरूणाचल-प्रदेश,

मध्यप्रदेश, तेलंगाना-राज्यानां उपमुख्यमन्त्रि: च भागं निर्वहन्ति। एतदतिरिच्य राज्य-केन्द्रशासित-प्रदेशानां वित्तमन्त्रिण: अपि समाविष्टा: सन्ति।

-----------------------------------

उत्तराखण्ड वन-विवरणम्

पर्यावरण-वन-ऋतुपरिवर्तन मन्त्रिणा भूपेन्द्र-यादवेनाद्य उत्तराखण्डस्य राजधान्यां देहरादूने "वन-विवरण-त्रयोविंशत्युत्तर-द्वि-सहस्रतम" इत्यस्य विमोचनं विहितम्। विवरणमिदं प्रत्येकस्मिन् वर्षद्वयाभ्यन्तरे भारतीय-वन-सर्वेक्षण-विभागेन प्रकाश्यते। अपि च देशस्य वन-वृक्ष-संसाधनानाम् आकलनं प्रस्तौति। विवरणानुसारेण भारतस्य आहत्य वृक्षावरण-क्षेत्रं अष्ट-लक्ष-सप्तविंशतिसहस्र सप्तपञ्चाशदुत्तर-त्रिशत-वर्ग-किलोमीटर-इति-वर्तते, य: देशस्य भौगोलिक-क्षेत्रस्य पञ्चविंशित-प्रतिशतं विद्यते। विगत-एकविंशुत्युत्तर-द्विसहस्रतम-वर्षस्य आकलन-तुलनायां वन-क्षेत्रं पञ्चचत्वारिंशदुत्तर-चतुर्दश-शत-वर्ग-किलोमीटर इति विवर्धितम्।

-----------------------------------

प्रधानमन्त्री-रण-उत्सव

प्रधानमन्त्रिणा नरेन्द्रमोदिना गुजरातस्य कच्छस्य धोरडो इत्यत्र आयोजितस्य रणोत्सवस्य प्रशंसा कृता। एकस्मिन् सामाजिकान्तर्जालीय संदेशे प्रधानमन्त्रिणा उल्लिखितं यत् अयं उत्सवः कच्छस्य परम्परायाः, संस्कृतेः, धरोहरस्य च प्रतीकः इति यः सर्वान् मोहयति। असौ अवदत् यत् महोत्सवः अद्भुतस्य शिल्पविपण्य: , सांस्कृतिककार्यक्रमस्य, खाद्यपरम्परायाः च माध्यमेन आगन्तुकानां आजीवनं यावत् अविस्मरणीयम् अनुभवं प्रददाति। प्रधानमन्त्रिणा जनै: आग्रह: कृत: यत् ते परिवारेण सह जीवने एकवारं अवश्यमेव रणोत्सवस्य दर्शनं कुर्वन्तु इति।

-----------------------------------

शीतलहरी

ऋतुविभागेन आगामिषु पञ्च-दिवसेषु जम्मू-कश्मीर, हिमाचलप्रदेशे च शीत-प्रकोप: विवर्धन-आशंका प्रकटिता। पञ्जाब-राजस्थान-राज्ययो: अपि सोमवासरं यावत् स्थितिरेषा यथावत् संधारयिष्यति। हिमाचल-प्रदेशे शीतलहर्या: कारणात् कुन्झटिका आच्छादिता। राज्ये अस्मिन् शुष्क-ऋतु: प्रभाविता जाता। भीषण-कुन्झटिका कारणात् कुल्लू-क्षेत्रे भुंतर-विमान-पत्तने वैमानिक-सेवा: प्रभाविता: जाता:।

---

<u>विश्व-स्वास्थ्य संघटनम्</u>

विश्व-स्वास्थ्य-संघटनेन- WHO इत्यनेन प्रतिपादितं यत् भारतदेशेन मलेरिया रोगस्य प्रकरणेषु न्यूनता अधिगता। एषा एका उल्लेखनीया प्रगति: अपि विद्यते। प्रर्वतमान-वर्षस्य स्वास्थ्य-संघटनस्य विश्व-मलेरिया-विवरणे इदं स्पष्ट-रूपेण प्रकाशितं यत् ब्रिटेन-देशस्य संसद परिसरे सप्ताहे अस्मिन् सञ्जाते उपवेशने सर्वेषां हितधारकाणां विवरणे विचार-विमर्शो जात:।

।।इति वार्ता:।।